दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् अधिकज्येष्ठकृष्णसप्तमी
ज्येष्ठ 24 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-225 | 1 | जून 07, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 राष्ट्रीयशिक्षानीतिः- महाविद्यालयेषु चतुर्वर्षीय- पाठ्यक्रमार्थं सीमिताः विषयाः; छात्रैः करणीया अन्वेषणा

3 HP CABINET DECISIONS- अतिक्रमणानां नियमितीकरणाय नीतेः स्वीकृतिः; शतशः रिक्तपदानि पूरयिष्यन्ते, हिमाचल- मन्त्रिमण्डलस्य बृहद्निर्णयाः

5 गौतम अडानी पुनः एशिया महाद्वीपस्य धनिकतमः व्यक्तिः अभवत्, द्वौ दिग्गजौ पृष्ठतः अकरोत्

## प्रधानमन्त्रिणा नरेन्द्रमोदिना आर्थिक-परामर्श-परिषदः सदस्यैः सह एकस्याः सभायाः अध्यक्षता कृता; भारतस्य आर्थिकपरिवर्तनस्य दीर्घकालिक विकासप्राथमिकतानां विषयेषु च विस्तृताः विषयाः चर्चिताः

प्रधानमन्त्रिणा नरेन्द्रमोदिना आर्थिक परामर्श-परिषदः सदस्यैः साकं विहितोपवेशनस्य अध्यक्षता विहिता। उपवेशने परिषदीय-सदस्याः प्रधानमन्त्री च भारतस्य आर्थिक वृद्धि उन्नेतुं विभिन्न-विचाराणां, उपायानां च विषये चर्चितवन्तौ । जीवन-स्तरे, व्यापारे च सुगमतामानेतुं अपि विचार-विमर्शः जातः। सदस्यैः पश्चिमैशिया संघर्षे भारत-विश्वे च परिलक्षितानां प्रभावानां आकलनविषयेऽपि सम्भाषणं कृतम्। सामाजिक-अन्तर्जालीय-सन्देशे प्रधानमन्त्रिणा प्रोक्तं यत् भारतीय-अर्थव्यवस्थायाः संरचनां, दीर्घकालिक विकास-प्राथमिकता सम्बद्ध-प्रकरणानां विषये भारतं द्रुतगत्या अग्रेसरति। प्रधानमन्त्रिणा विविध-विषयेषु स्वविचाराः प्रकटिताः सुगमजीवनम् एवं सुगम-व्यवसायः इत्येतयोः विषये अपि चर्चा जाता।



## सुभाषितम्

**अर्थानाम् अर्जने दुःखम्,**
**अर्जितानां च रक्षणे।**
**आये दुःखं व्यये दुःखं,**
**धिक् अर्थाः कष्टसंश्रयाः।।**

विभिन्न संपत्तियों और धन को अर्जित करने में दुःख सहन करना ही पड़ता है परन्तु अर्जित संपत्ति की रक्षा करने में भी दुःख सहना पड़ता है। धिक्कार है ऐसी संपत्ति को जिसका कष्टों और मुसीबतों से इतना निकट संबन्ध है कि उसके आने (आय) और जाने (व्यय) होने पर दुःख ही प्राप्त होता है।

हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## पञ्जाबे फ़िरोज़पुर-फाजिल्का-मार्गे वाहन ट्रक-यानयोः सह सङ्घट्टे-न्यूनातिन्यूनं नव जनाः मृताः

पञ्जाब-राज्ये फ़िरोज़पुर-फाजिल्का-मार्गे एकस्यैव कुटुम्बस्य सदस्यान् वहन्तं वाहनस्य ट्रक् यानेन सह संघट्टे न्यूनातिन्यूनं नव जनाः मृताः, द्वाविंशति जनाः च व्रणिताः। पीडिताः, सर्वे एकस्यैव कुटुम्बस्य सदस्याः आसन, ये परिवारे मृतस्य एकस्य जनस्य अस्थि-विसर्जनाय व्यास-नद्यां गच्छन्तः आसन् तदैव एषा दुर्घटना अभवत्। बहवः जनाः घटनास्थले एव मृताः इति कथ्यते, अपि च व्रणिताः चिकित्सायै फ़िरोज़पुर-सिविल-चिकित्सालये, फरीदकोट-चिकित्सकीय महाविद्यालये च प्रेषिताः। आरक्षकाधिकारिणः आकाशवाण्या सह वार्तालापे उक्तवन्तः यत् द्वाविंशति जनेषु बहवः गम्भीराः सन्ति। घटनायाः अनन्तरं शीघ्रमेव वरिष्ठाः आरक्षकाधिकारिणः दुर्घटनास्थलं प्राप्य स्थानीयनिवासिनां साहाय्येन उद्धारकार्यम् आरब्धवन्तः । व्रणिताः निष्काश्य समीपस्थेषु चिकित्सालयेषु प्रवेशिताः।

## विदेशमन्त्री डा.एस.जयशङ्करः नवदेहल्यां नेपालदेशस्य विदेशमन्त्रिणा शिशिर खनाल इत्यनेन सह वार्तालापं कृतवान्



विदेशमन्त्री डा.एस.जयशङ्करः नवदेहल्यां नेपालदेशस्य विदेशमन्त्रिणा शिशिर खनाल इत्यनेन सह वार्तालापं कृतवान्। नेपाल-देशस्य विदेश-मन्त्रालयेन उक्तं यत् उपवेशनावधौ उभौ पक्षौ परस्पर हितानां विषयेषु चर्चिष्यतः, यस्मिन् व्यापारः, निवेशः, सम्पर्कः, ऊर्जा, जनसम्पर्केत्यादिषु प्रमुखेषु क्षेत्रेषु सहकारं वर्धितुं शक्यते। विदेशमन्त्रालयस्य प्रवक्ता रणधीर जायसवालः अवदत् यत् इयं यात्रा भारत-नेपाल-देशयोः विशेषसहभागित्वम् इतोऽपि सुदृढं करिष्यति। सः अवोचत् यत् द्वयोः देशयोः मध्ये चर्चासु विकाससहयोगः, जनेषु सम्बन्धः, व्यापारः, निवेशादि विस्तृताः कार्यक्रमाः सम्मिलिताः सन्ति ।

## सी.बी.एस.ई. इत्यनेन अङ्कानां सत्यापनाय पुनर्मूल्यांकनाय च आवेदनपत्राणां प्रस्तुतीकरणस्य अन्तिमातिथिः अद्य पर्यन्तं विस्तारिता

सी.बी.एस.ई. इति केन्द्रीय-माध्यमिक-शिक्षा-परिषदा अङ्क-सत्यापनार्थं सहैव पुनर्मूल्याङ्कनार्थं आवेदन प्रस्तुतेः अन्तिमा तिथिः अद्य पर्यन्तं वर्धिता। गतदिवसे सामाजिकान्तर्जालीय पटले एकेन सन्देशेन परिषदा प्रख्यापितं यत् छात्राः इदानीं अद्य मध्यरात्रिं यावत् स्व-आवेदनानि प्रस्तोतुं शक्नुवन्ति। सी. बी. एस. ई. परिषदा प्रोदीरितं यत् छात्रहितं मनसि निधाय, आवेदन-प्रक्रियां पूरयितुं छात्रेभ्यः अतिरिक्त-समयप्रदानाय एषः निर्णयः स्वीकृतः । एतस्मात् पूर्वम् आवेदनस्य अन्तिमा तिथिः अस्य मासस्य षड् दिनाङ्क यावत् आसीत्। परिषदा सर्वेभ्यः योग्य-छात्रेभ्यः परामृष्टं यत् ते निर्धारित समये एव स्व-आवेदन-प्रक्रियां सम्पादयन्तु।

## भारतीय-पुरुष-दलेन तृतीयवारं हॉकी-एशिया-कप-अण्डर-18 विजितम्



हॉकीति क्रीडायां भारतीय-पुरुष-दलेन काकामि-गाहारा-नगरे आयोजिते निर्णायक-स्पर्धायां आतिथेय-जपान-दलम् चत्वारि एकम् इत्यङ्कैः पराजित्य तृतीयवारं एशिया-कप-अण्डर-18 विजितम्। तत्रैव भारतीय-महिला-दलेनापि दक्षिणकोरिया-दलम् त्रीणि शून्यं इत्यङ्कैः पराजित् कांस्यपदकं विजितम् ।

## भारतम् अद्यापि विश्वस्य शीघ्रतम - वर्धमानानां प्रमुख-अर्थव्यवस्थानां मध्ये विशिष्टस्थानं धारयति - राजनाथसिंहः

रक्षामन्त्री राजनाथसिंहः उक्तवान यत् भारतम् अद्यापि विश्वस्य शीघ्रतम - वर्धमानानां प्रमुख-अर्थव्यवस्थानां मध्ये विशिष्टस्थानं धारयति। साम्प्रतं बहवः देशाः आर्थिक-अनिश्चिततां सम्मुखीकुर्वन्ति। गत-प्रवर्तमान-वित्तवर्षयोः मध्ये सप्त दशमलव सप्त प्रतिशत सकल गृहयोत्पादनवृद्धेः उल्लेखं कुर्वन् श्री सिंह अवदत् यत् एषा उपलब्धिः भारतीय अर्थव्यवस्थायाः दृढ़तां अथ च अन्तर्निहितं सामर्थ्यं प्रदर्शयित। यह गतद्वादशवर्षेषु विकसितमस्ति। सामाजिक अन्तर्जाल-माध्यमे प्रकाशिते सन्देशे सः उक्तवान् यत् प्रधानमन्त्री नरेन्द्र मोदिनः नेतृत्वे भारतम् आर्थिक वृद्धि सन्धारयितुं, आर्थिकविकासेन सह संयोजितवान् ।

# राष्ट्रीयशिक्षानीतिः- महाविद्यालयेषु चतुर्वर्षीय-पाठ्यक्रमार्थं सीमिताः विषयाः; छात्रैः करणीया अन्वेषणा




**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशे शैक्षणिकसत्रात् (2026-27) २६ राजकीय-महाविद्यालयेषु चतुर्वर्षीयः स्नातक- पाठ्यक्रमः आरप्स्यते। राष्ट्रीयशिक्षानीतेः (NEP- 2020) अन्तर्गतम् एषा व्यवस्था प्रवर्त्यते। परञ्च, एतेषां संस्थानां सर्वे विषयाः नूतनप्रारूपे न सम्मिलिताः। बहुषु महाविद्यालयेषु अनेके विषयाः अद्यापि त्रिवर्षीयोपाधिप्रणाल्यामेव प्रचालयिष्यन्ते। अनेन कारणेन प्रवेशार्थिभिः छात्रैः शिक्षणसंस्थानेन सह स्वप्रियविषयस्य उपलब्धतायाः सम्यक् अन्वेषणा करणीया भविष्यति।

राजकीयमहाविद्यालये (धर्मशाला) २९ विषयेषु अष्ट विषयाः चतुर्वर्षीयपाठ्यक्रमे न सन्ति। वल्लभ-राजकीय- महाविद्यालये (मण्डी) २८ विषयेषु नव विषयाः त्रिवर्षीयाः एव स्थास्यन्ति। नेताजी सुभाषचन्द्र बोस स्मारक महाविद्यालये (हमीरपुर) २७ विषयेषु १० विषयाः पुरातनव्यवस्थायामेव सन्ति। राजकीयकन्यामहाविद्यालये (शिमला) २८ विषयेषु १८ विषयाः त्रिवर्षीयोपाधिरूपेण एव पाठयिष्यन्ते। महाराणा प्रताप राजकीय- महाविद्यालये (अम्ब) राजकीय आर्यमहाविद्यालये (नूरपुर) च २० विषयेषु १३-१३ विषयाः त्रिवर्षीयव्यवस्थायां स्थास्यन्ति। उच्चशिक्षाविभागस्य निदेशकः हरीश कंवरः अवदत् यत् शोधसुविधानां अभावात् अनेके विषयाः अस्मात् प्रारूपात् बहिः सन्ति। भविष्ये संसाधनानां विकासे सति अन्ये विषयाः अपि नूतनप्रारूपे संयोक्ष्यन्ते। छात्रैः प्रवेशावेदनपत्रपूरणात् पूर्वं महाविद्यालयात् विषयवारस्थितेः पुष्टिः अवश्यं करणीया।

## प्राथमिकता-प्राप्ताः विषयाः

चतुर्वर्षीयपाठ्यक्रमार्थं विज्ञान- वाणिज्य- पारम्परिक- कलाविषयेभ्यः अधिका प्राथमिकता दत्ता अस्ति। एतेषु आङ्ग्लभाषा, गणितं, भौतिकविज्ञानं, रसायनविज्ञानं, वनस्पतिविज्ञानं, प्राणिविज्ञानं च सम्मिलितानि सन्ति। अर्थशास्त्रं, इतिहासः, राजनीतिविज्ञानं, भूगोलं, हिन्दी, वाणिज्यं च मुख्यकेन्द्ररूपेण वर्तन्ते। समाजशास्त्रं, संस्कृतं, सङ्गीतं, शारीरिकशिक्षा च अपि बहुषु संस्थानेषु स्थानं लब्धवन्तः।

## बहिष्कृताः (पृथक्कृताः) विषयाः

कौशलाधारिताः, व्यावसायिक्याः, विशिष्टप्रकृतिकाः च अनेके पाठ्यक्रमाः इदानीं चतुर्वर्षीयकार्यक्रमात् बहिः सन्ति। एतेषु पत्रकारिता- जनसञ्चारः, पर्यटनयात्राप्रबन्धनं, सङ्गणकानुप्रयोगः च सम्मिलिताः सन्ति। चित्रकला, प्रयुक्तकला, गृहविज्ञानं, नृत्यं, शिक्षा, दर्शनशास्त्रं, मनोविज्ञानं, मानवशास्त्रं च अद्यापि त्रिवर्षीयव्यवस्थायामेव सन्ति। शिक्षाविभागानुसारं, विषयचयनस्य मुख्योद्देश्यं शोधक्षमता अस्ति, न तु केवलं छात्रमागः।

# काङ्ग्रेसदलं सत्तायां केवलं सुखं भोक्तुम् आगतम्, स्वकीयाः एव उत्थापयन्ति कार्यप्रणाल्याम् आक्षेपान्- अनुरागठाकुरः



**हिमसंस्कृतवार्ताः- हमीरपुरम्।** प्रदेशस्य काङ्ग्रेससर्वकारः सत्तायां केवलं सुखभोगार्थमेव आगतः अस्ति। जनसामान्यानां सुखदुःखैः सह अस्य कश्चपि सम्बन्धः नास्ति। यदि सर्वकारस्य कार्यप्रणाल्याम् विपक्षः आक्षेपान् उत्थापयेत् तर्हि भिन्ना वार्ता आसीत्, किन्तु अत्र तु दलस्य एव उपाध्यक्षेण वित्तमञ्जूषाणां प्रकरणानां सन्दर्भं दत्त्वा स्वकीयः एव सर्वकारः आक्षेपितः। एषा वार्ता हमीरपुरे पूर्वकेन्द्रीयमन्त्रिणा वर्तमाने सांसदेन अनुरागठाकुरेण प्रकटीकृता। तेन प्रतिपादितं यत् एताः वित्तमञ्जूषाः कः ददाति, कुतश्च आगच्छन्ति, अस्य उत्तरं प्रदेशसर्वकारस्य प्रतिनिधिभिः एव दातव्यं भविष्यति।

शुक्रवासरे हमीरपुरस्य 'परिधि गृहं' (सर्किट हाउस) प्राप्य अनुरागठाकुरेण 'नाऊ फॉर क्लाइमेट' इति मुख्यविषयस्य अन्तर्गतं पादपरोपणं कृतम्। अस्मिन् अवसरे सः अवदत् यत् जलवायुपरिवर्तने जायमानं अविश्वसनीयं परिवर्तनं अतीव चिन्ताजनकम् अस्ति। हिमनद्यः (ग्लेशियर) निरन्तरं विलीनाः भवन्ति, येन समुद्रस्य जलस्तरः वर्धमानोऽस्ति। ऋतुविज्ञानिनः अपि वर्षतुं सम्यक्तया अनुमानं कर्तुं न शक्नुवन्ति। पर्यावरणस्य स्थितिः पूर्ववत् नास्ति। पर्यावरणस्य परिष्काराय अधिकं पादपरोपणम् अत्यावश्यकम् अस्ति। तेन देशस्य १४० कोटि-भारतवासिभ्यः सप्रश्रयम् अनुरोधः कृतः यत् अधिकतमाः वृक्षाः रोपयित्वा पर्यावरणस्य संरक्षणं कुर्युः। एकः वृक्षः एकस्मिन् वर्षे २२ किलोग्राममितं 'कार्बन डाइऑक्साइड' वाष्पं शोषयति, तर्हि कोटिशः वृक्षाः कियान् लाभं प्रदास्यन्ति। अतः पर्यावरणरक्षायै सर्वेषां सजगता आवश्यकी अस्ति।

मुख्यमन्त्रिणः वक्तव्यं प्रति सांसदः अनुरागठाकुरः अवदत् यत् ये प्रत्याशिनः प्रखरतापेऽपि जनानां मध्ये गत्वा श्रमं कृतवन्तः, येषां पक्षे जनसामान्यैः स्वमताधिकारस्य प्रयोगः कृतः, तेषां मूल्यं केवलं 'एकदिवसीयम्' इति वक्तुं मुख्यमन्त्रिणः पदस्य गरिमायै न शोभते। एतत् मुख्यमन्त्रिणः सङ्कुचितचिन्तनं दर्शयति। भारतीयजनतादलं प्रदेशस्य द्वि-तृतीयांशेषु आसनेषु विजयी अभवत्। भाजपा-विचारधारायाः प्रत्याशिनः जित्वा सम्मुखम् आगताः सन्ति, काङ्ग्रेसदलं च एतां पराजयं पक्तुं असमर्थः वर्तते। अनुरागठाकुरेण संसूचितं यत् भानुपल्ली- बिलासपुर- रेलमार्गस्य कृते प्रदेशसर्वकारस्य द्विसहस्रकोटिरूप्यकाणां (२००० करोड़) दायित्वम् अवशिष्टम् अस्ति। राज्यसर्वकारः एतां धनराशिं प्रदातुं न शक्नोति, ईदृश्यां स्थितौ नूतनरेलमार्गाणां विकासाय धनं कुतः आगमिष्यति।

# भारतस्य क्रिकेट-नियन्त्रण-मण्डलेन बी.सी.सी.आई. इत्यनेन इंग्लैण्ड-आयरलैण्ड-देशयोः क्रीडा यात्रायै षोडशसदस्यानां विंशति प्रति विंशति अन्ताराष्ट्रिय-दलस्य घोषणा कृता




भारतस्य क्रिकेट-नियन्त्रण-मण्डलेन बी.सी.सी.आई. इत्यनेन इंग्लैण्ड-आयरलैण्ड-देशयोः क्रीडा यात्रायै षोडशसदस्यानां विंशति प्रति विंशति अन्ताराष्ट्रिय-दलस्य घोषणा कृता। सूर्यकुमार यादवस्य स्थाने श्रेयस अय्यरः भारतस्य नूतनः टि-20 इति दलस्य नायकत्वेन नियुक्तः। अपि च, तिलक वर्मा उपनायकरूपेण नामाङ्कितः अस्ति। बी. सी. सी. आई. इत्यनेन प्रथमवारं वैभव सूर्यवंशी इत्यमुम् अपि दले समाविष्टम्, येन गत आई. पी. एल. सत्रे सर्वाधिक धावनांकाः समर्जिताः। प्रिंसयादवोपि दले सम्मिलितः अस्ति। अद्य मुम्बई-नगरस्य बी. सी. सी. आई. मुख्यालये आयलैण्ड-इंग्लैण्ड-देशयोः यात्रायै, जपान् देशे एशियन्-गेम्स क्रीडायाः कृते, तथा भारत-अ-दलस्य श्रीलङ्का-प्रवासस्य (बहु-दिवसीय क्रीडायाः) कृते दलस्य निर्णयार्थं मुख्य-चयनकर्ता अजित अगरकरस्य, बी. सी. सी. आई. इत्यस्य सचिवस्य देवजीत-सैकिया इत्यस्य च नेतृत्वे भारतीय दलस्य पुरुष-चयनसमितेः सभायाः अनन्तरं दलस्य घोषणाऽभवत्।

# भारतीय युवजनाः राष्ट्रस्य महत्तमा शक्तिः विद्यन्ते - मनसुख-माण्डवीयः

केन्द्रीय-युवकार्य - क्रीडामन्त्री मनसुख-माण्डवीयः भषितवान् यत् भारतीय युवजनाः राष्ट्रस्य महत्तमा शक्तिः विद्यन्ते। तथा च ते सप्तचत्वारिंशदुत्तर-द्विसहस्रतम वर्ष पर्यन्तं विकसितभारतस्य स्वप्नं प्रत्यक्षीकरणे प्रमुखां भूमिकां निर्वहिष्यन्ति। नवदेहल्यां समायोजिते विकसित-भारताय-युवा-मम भारतम् युवा-सम्मेलनम् सम्बोधयन् असौ उक्तवान यत् प्रधानमन्त्रिणा नरेन्द्रमोदिना यूनां विचाराणां, स्वाभिलाषाणां, राष्ट्रनिर्माणाय स्वैच्छिक - सेवाभावस्य आदान-प्रदानार्थं मम भारतं इति मञ्चः विनिर्मितः।

# देहल्यारक्षिदलेन मालवीय-नगर-अग्निकाण्डस्य सम्बन्धे केशव नेगी नामाख्यं भोजनालयस्य पाचकः निगृहितः

देहल्यारक्षिदलेन मालवीय-नगर-अग्निकाण्डस्य सम्बन्धे केशव नेगी नामाख्यं भोजनालयस्य पाचकः निगृहितः । एषः अग्निकाण्डः अस्य मासस्य तृतीय-दिवसे मालवीय-नगर-स्थिते एकस्मिन भोजनालये सञ्जातः। अस्यां दुर्घटनायां एकविंशतिः जनाः मृत्युपगताः, चत्वारिंश्चाहताः। पूर्वमेव आरक्षिदलेन भोजनालयस्य स्वामी हत्यायाः, अन्येषां सम्बद्ध अपराधानां आरोपेषु गृहीतः आसीत्। आरक्षिदलेन सूचितं यत् प्रकरणस्यास्य अन्वेक्षणमपि प्रचलति ।

# HP CABINET DECISIONS- अतिक्रमणानां नियमितीकरणाय नीतेः स्वीकृतिः; शतशः रिक्तपदानि पूरयिष्यन्ते, हिमाचल- मन्त्रिमण्डलस्य बृहद्निर्णयाः



**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेश- मन्त्रिमण्डलस्य उपवेशनं शनिवासरे मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खुमहोदयस्य अध्यक्षतायाम् आयोजितम्। उपवेशने अस्मिन् अनेके प्रमुखाः निर्णयाः स्वीकृताः। मन्त्रिमण्डलेन विभिन्नविभागानां पक्षतः पृथक्-पृथक् कारणैः पूर्वं निरस्तान् कारुणामूलक- नियुक्तिप्रकरणान् (कम्पैशनेट अपॉइंटमेंट्स) प्रति पुनर्विचाराय स्वीकृतिः दत्ता। एकमुश्त-विशेषोपायत्वेन सर्वाधिक- न्यायसङ्गतानां निरस्तप्रकरणानां पुनः परीक्षणं करिष्यते तथा च आवश्यकी शिथिलता प्रदास्यते। एतेन साकं, मन्त्रिमण्डलेन शासकीयभूमौ कृतानां केषाञ्चित् अतिक्रमणानां नियमितीकरणाय 'नियमितीकरण नीति-२०२६' इत्यस्याः अनुमोदनं कृतम्। एषा नीतिः तान् भूमिहीनपरिवारान् सीमान्तकृषकांश्च ध्यानं निधाय मानवीयसरोकारैः सज्जीकृता, ये आवास- कृषि- उद्यानकर्मकार्याणां कृते शासकीयभूमौ आधिपत्यं स्थापयन्तः सन्ति। एषा नीतिः सर्वोच्चन्यायालयस्य निर्देशानुसारं विरचिता अस्ति, स्वीकृत्यर्थं भारतसर्वकारं प्रति प्रेषिता।

## कृषिऋण-ब्याज-अनुदानयोजना प्रारप्स्यते, ७०० पदानां पूरणाय स्वीकृतिः

मन्त्रिमण्डलेन तेषां कृषकाणां कृते 'कृषि ऋण ब्याज अनुदान योजना' प्रारब्धुं निर्णयः गृहीतः, येषां भूमिः नीलामी-सङ्कटं सम्मुखीकुर्वती अस्ति। अस्य अन्तर्गतं राज्यसर्वकारः पात्रकृषकाणां ३ लक्षरूप्यकाणि यावत् कृषिऋणस्य व्याजदायित्वस्य ५० प्रतिशत् भागं स्वयं वहिष्यति। अनेन प्रदेशस्य ६,३५६ कृषकाः लाभान्विताः भविष्यन्ति। मन्त्रिमण्डलेन नियुक्तिनिदेशालयस्य अन्तर्गतं 'वर्क इन्स्पेक्टर' इत्यस्य ४०० पदानां सृजनं कृत्वा पूरणाय स्वीकृतिः प्रदत्ता। उपवेशने स्वास्थ्य एवं परिवार कल्याण विभागे ३०० चिकित्साधिकारिणां तथा २५० चतुर्थश्रेण्याः 'मल्टी टास्क वर्कर' पदानां पूरणाय अनुमोदनं विहितम्।

## २०० 'स्टाफ नर्स' इत्येतैः सह एतानि पदानि अपि पूरयिष्यन्ते

एतदतिरिच्य, स्वास्थ्यविभागे २०० 'स्टाफ नर्स' पदानां नियुक्तिः अपि स्वीकृता। मन्त्रिमण्डलेन स्वास्थ्यविभागे एव १६२ पदानि पूरयितुं निर्णयः विहितः, येषु ७६ शल्यक्रिया-प्रकोष्ठ-सहायकाः (ऑपरेशन थिएटर असिस्टेंट), ३६ रेडियोग्राफर- महोदयाः तथा ५० 'लैब तकनीशियन ग्रेड-२' पदानां समावेशः अस्ति। राज्यस्य विभिन्नेषु आयुर्विज्ञानमहाविद्यालयेषु विभिन्नविभागानां ७५ सहायक- प्राध्यापकानां पदानां सृजनं कृत्वा पूरणाय स्वीकृतिः प्रदत्ता। मण्डी-जनपदस्य नेरचौक-स्थिते श्रीलालबहादुरशास्त्री- राजकीय- चिकित्सा-महाविद्यालये हृदयशलाकाविभागे (कार्डियोलॉजी विभाग) सहायकप्राध्यापकस्य द्वे, वरिष्ठ- रेजिडेंट द्वे पदे पूरयितुं सम्मतिः प्रदत्ता। मन्त्रिमण्डलेन डा राधाकृष्णन राजकीय चिकित्सा महाविद्यालय हमीरपुरम् इत्यस्य षट् नामितप्राध्यापकेभ्यः पात्रताप्राप्तये आवश्यकावधौ ६तः २० दिनानां न्यूनतायाः कारणात् एकमुश्त- विशेषशिथिलता प्रदातुं निर्णयः स्वीकृतः।

## अंशकालिकाः कर्मचारिणः भविष्यन्ति दैनिकवेतनभोगिनः

मन्त्रिमण्डलेन काङ्गड़ा-जनपदस्य नागरिक- चिकित्सालये 'देहरा' इत्यत्र विभिन्नश्रेणीनां १२ पदानि तथा खण्डचिकित्साधिकारिकार्यालय-देहरा इत्यत्र ३ पदानि सृजित्वा पूरयितुं स्वीकृतिः दत्ता। हिमाचलप्रदेशविश्वविद्यालयः शिमला इत्यत्र विभिन्नविभागेषु सहायकप्राध्यापकानां १७ पदानि पूरयितुं निर्णयः कृतः। मन्त्रिमण्डलेन अध्ययन- अवकाशे गच्छताम् कर्मचारिणाम् कृते पूर्णवेतनं प्रदातुं निर्णयः स्वीकृतः। यैः कर्मचारिभिः पूर्वम् अध्ययन- अवकाशः गृहीतः आसीत्, तेभ्यः अपि अवशिष्टवेतनराशेः भुक्तिः करिष्यते। ३१ मार्च २०२६ पर्यन्तं निरन्तरं सप्तवर्षाणां सेवां पूर्णं कृतवद्भ्यः अंशकालिककर्मचारिभ्यः (पार्ट टाइम वर्कर) दैनिकवेतनभोगिरूपेण परिणतकर्तुं स्वीकृतिः प्राप्ता। 'जॉब ट्रेनी' जनेभ्यः १५ दिनानां पितृत्व- अवकाशः (पेटर्निटी लीव) प्रदास्यते। हमीरपुरजनपदस्य नेरीस्थिते उद्यानिकी- वानिकी- महाविद्यालयले विभिन्नश्रेणीनां त्रीणि पदानि सृजित्वा पूरणाय स्वीकृतिः दत्ता।

## चढियार-क्षेत्रे एकं नूतनं लोकनिर्माणविभागस्य उपमण्डलम्

मण्डलायुक्त-कार्यालय-मण्डी इत्यत्र 'जूनियर ऑफिस असिस्टेंट (IT)' इत्यस्य द्वे पदे सृजितुं निर्णयः कृतः। गृहसुरक्षा-नागरिकसुरक्षाविभागे (होमगार्ड) एकं 'जूनियर ऑफिस असिस्टेंट (IT)' तथा दिव्यांगजनेभ्यः आरक्षितं 'मल्टी टास्क वर्कर' इत्यस्य एकं पदं पूरयिष्यते। काङ्गड़ा-जनपदस्य बैजनाथ- बीड़- उपमण्डलयोः पुनर्सङ्गठनेन 'चढ़ियार' इत्यत्र लोकनिर्माणविभागस्य नूतनम् उपमण्डलं संस्थापयिष्यते। मन्त्रिमण्डलेन हिमाचलप्रदेश- प्रशासनिकसेवा (HPAS) इत्यस्य त्रीणि पदानि पूरयितुं निर्णयः विहितः।

## ८० 'पोस्ट कोड' विज्ञापनानि प्रतिनिवर्तिष्यन्ते, 'स्टार्टअप' योजनायाः चतुर्थचरणः प्रारप्स्यते

पूर्वतन-हिमाचलप्रदेश-कर्मचारि चयन- आयोग- हमीरपुरस्य पक्षतः प्रसारितानि ८० 'पोस्ट कोड' सम्बन्धि विज्ञापनानि प्रतिनिवर्तयितुं, सम्बद्ध- अभ्यर्थिभ्यः च ४.२७ कोटिरूप्यकाणां परीक्षाशुल्कं प्रतिदातुं स्वीकृतिः दत्ता। मन्त्रिमण्डलेन 'राजीव गांधी स्वरोजगार स्टार्टअप योजना' इत्यस्याः चतुर्थचरणं प्रारब्धुं स्वीकृतिः प्रदत्ता। अस्याः योजनायाः अन्तर्गतं पात्रलाभार्थिभ्यः ई-यानं (ई-बस) क्रेतुं ५० प्रतिशत् तथा डीजल-यानं क्रेतुं ३० प्रतिशत् अनुदानं (सब्सिडी) प्रदास्यते, येन स्वरोजगारः प्रवर्धिष्यते सार्वजनिकयातायातसेवा च सुदृढा भविष्यति।

## विजयाकृषिकार्याय 'एन.डी.पी.एस.' नियमेषु भविष्यति संशोधनम्

मन्त्रिमण्डलेन हिमाचलप्रदेश- एनडीपीएस- नियम- १९८९ मध्ये संशोधनार्थं स्वीकृतिः दत्ता, येन चिकित्सा- वैज्ञानिकोद्देश्येभ्यः विजयायाः कृषिकर्म, प्रसंस्रणं, निर्माणं, भण्डारणं, परिवहनं च विनियमितं कर्तुं शक्ष्यते। शिमला-जनपदस्य जुब्बल, कोटखाई, रोहड़ू क्षेत्रेषु १५ अग्निकाण्ड- प्रभावितेभ्यः परिवारेभ्यः विशेषसहायतामञ्जूषा स्वीकृतः। येषां परिवाराणां गृहाणि पूर्णतः विनष्टानि, तेभ्यः प्रतिपरिवारं सप्तलक्ष (७ लाख) रूप्यकाणां वित्तीयसाहाय्यं प्रदास्यते। आहत्य ८४.७० लक्षरूप्यकाणां सहायताशङ्खला वितरिष्यते।

## मल्टी टास्क वर्कर नियुक्तये 'मन्त्रिमण्डलोपसमितेः' सङ्घटनस्य निर्णयः

उपवेशने उपमुख्यमन्त्रिणः मुकेश अग्निहोत्रिणः अध्यक्षतायाम् एका मन्त्रिमण्डलीय-उपसमितिः निर्मातुं निर्णयः स्वीकृतः, या विभिन्नविभागेषु 'मल्टी टास्क वर्कर' जनानां नियुक्तिप्रक्रियां केन्द्रीकृतां सुव्यवस्थितां च कर्तुं विचारं करिष्यति। मन्त्रिमण्डलेन गार्हस्थिक- उपयोगाय खनिजपरिवहनं कुर्वतां ट्रैक्टरवाहनानां 'कंपाउंडिंग फीस' ४,५०० रूप्यकतः न्यूनीकृत्य ५०० रूप्यकाणि कर्तुम् अनुमतिः दत्ता। अनेन ट्रैक्टर- चालकेभ्यः महती शान्तिः प्राप्स्यते।


## हिमकेयर-योजनायाम् अधुना ७ तथा १० लक्षरूप्यकाणां स्वास्थ्यबीमाकवरम्

मन्त्रिमण्डलेन 'ग्रेजिंग पॉलिसी-२०२६' (पशुचारणनीति) स्वीकृता, यस्याः अन्तर्गतं वनविभागः पशुपालनविभागश्च संयुक्तविधेन एकं 'ऑनलाइन' पोर्टलतन्त्रं विकसिष्यतः। अनेन पशुपालकेभ्यः वास्तविकसमये अनुमतिपत्राणि उपलप्स्यन्ते ग्रामीण- अर्थव्यवस्था च बलं प्राप्स्यति। उपवेशने 'हिमकेयर' योजनायाः अन्तर्गतं स्वास्थ्यबीमासंरक्षणं बीमाप्रतिरूपस्य (इंश्योरेंस मॉडल) अन्तर्गतं सञ्चालितुं निर्णयः विहितः। संशोधितव्यवस्थानुसारं पात्रलाभार्थिभ्यः अधुना ५ लक्षरूप्यकाणां स्थाने ७ लक्षरूप्यकाणि तथा १० लक्षरूप्यकाणि यावत् स्वास्थ्यबीमाकवरं प्रदास्यते। मन्त्रिमण्डलेन तान्त्रिकशिक्षणसंस्थानां कृते 'राज्य नवाचार नीति' अपि स्वीकृता। अस्या नीतेः मुख्योद्देश्यं हिमाचलप्रदेशं नवोन्मेष- उद्यमिता- स्टार्टअप क्षेत्रेषु प्रमुखरूपेण विकसितं करणम् अस्ति। अस्या नीतेः कार्यान्वयनार्थं वर्षे २०२६तः २०२८ पर्यन्तं २ कोटिरूप्यकाणां प्रावधानं कृतम् अस्ति।

## विभिन्नाः स्वास्थ्यसंस्थाः स्तरोन्नताः कृताः

उपवेशने काङ्गड़ा-जनपदस्य 'पटोला' क्षेत्रे १३२/ ३३ केवी सब-स्टेशन तथा 'कंगैहण' क्षेत्रे २२० केवी स्विचिंग सबस्टेशन निर्माणार्थं हिमाचलप्रदेश पावर ट्रांसमिशन कॉर्पोरेशन लिमिटेड पक्षे ४० वर्षाणां पट्टाधिकारं (लीज़) प्रदातुं स्वीकृतिः प्रदत्ता। क्रमशः...४



हिमसंस्कृतवार्ता
असमप्रदेशीयः
विज्ञानशिक्षकः, नारदोपाध्यायः

# संस्कृतं मधुरं सदा- ४६

आत्मसाक्षात्कारः अथवा ब्रह्मप्राप्तिर्हि मनुष्यजीवनस्य अन्तिमलक्ष्यं वर्तते। यावत् आत्मसाक्षात्कारः न सम्भवेत् तावज्जीवः नानायोनिगतं शरीरं धृत्वा प्रपञ्चे भ्रममाणः भवति। करुणावशतः यदा परमात्मा तस्मै मनुष्ययोनिं दद्यात्, तदा सः आत्मसाक्षात्काराय एकम् अवकाशं प्राप्नोति। परन्तु अवकाशोऽयमपि यदि तस्य विफलतां गच्छेत्, तदा तस्य विविधयोनिं प्रति गमनरूपा पुनरावृत्तिः जायते। एवं प्रकारेण ब्रह्मप्राप्तिः न सहजविषयः। अत्यन्तं सौभाग्येन, भगवत्कृपया च हि जीवस्य ब्रह्मप्राप्तिः सम्भवति, नान्यथा। तस्य कृते मनुष्यस्य साधनाप्रकारः कीदृशः भवेदिति विषये अत्र किञ्चित् प्रस्तूयते। व्यतिरेक-अन्वयौ इति प्रकारद्वयेन ब्रह्मज्ञानस्य साधना भवति। अद्यत्वे अवश्यमपि एतादृश्येव प्रथा जातास्ति यत् जना वेदान्तस्यार्थं हि व्यतिरेकसाधनां मन्यन्ते। ते 'नेति नेति' इत्युक्त्वा जगत् स्वप्नवत्, गन्धर्वनगरं, शशशृङ्गं तथा रज्ज्वां सर्पवत् भावः इत्येवं सर्वथा असदुक्त्वा सर्वस्य अस्वीकारं तु कुर्युः, परन्तु यत्किञ्चित् सर्वमपि सच्चिदानन्दस्वरूपम् एकमात्रं नित्यञ्च ब्रह्म हि वर्तते इति तथ्यमपि अस्वीकारं कुर्युः। तस्मात् कदाचित् जगतो बाधं कारं कारं ब्रह्मणोऽपि बाधो जायते। एवञ्चेत् मनुष्यस्य चित्तम् एकजडवत् शून्यभूमिकायां सम्प्राप्य तिष्ठेत्। वस्तुतो जगत् न कदापि आसीत्, न वा अस्ति, न तु भविष्यति- इति तु सत्यकथनमेव। परन्तु अनेन सह एतदपि सर्वथा सत्यं यत् जगद्रूपेण यत्किमपि भासमानमस्ति, यस्मिन् पुरुषे च भासते , तद्धि ब्रह्म कथ्यते। जगत् सर्वथा वस्तुशून्यम् इत्येतादृशी मान्यता 'व्यतिरेक' साधना उच्यते, एवञ्च चेतनाचेतनात्मके समस्तविश्वे एकस्याः अखण्ड- परिपूर्ण- ब्रह्मसत्तायाः अनुभवश्चेत् इयं 'अन्वय' साधना आख्यायते। एतस्य साधनाद्वयस्य समन्वयेन यत् 'सर्वं खल्विदं ब्रह्म नेह नानास्ति किञ्चन' इति तत्त्वस्य प्रत्यक्षानुभूतिः भवति, सा हि ब्राह्मी स्थितिः कथ्यते इति, शुभम्।

# वार्ता-संवादः



हिमसंस्कृतवार्ताः , ईदरधीरजः,हैदराबादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे सर्वेषां स्वागतं व्याहरामि। नमस्ते काव्ये!। मुम्बानगर्याम् एकेन मुख्याधिकारिणा प्रमादेन त्रिचक्रिका-चालकाय पञ्चदश-सहस्र-रूप्यकाणि दत्तानि। तेन सत्यवादिना चालकेन तत् धनं प्रत्यर्पितम्। इदं वृत्तम् अन्तर्जाले सर्वैः श्लाघितम्।

**काव्या-** सत्यं, तेन महती प्रामाणिकता प्रदर्शिता। मुम्बानगर्यां प्रतिमासं द्विलक्षविंशतिसहस्र- रूप्यकेषु अर्जितेषु अपि तत्र जीवनं बहुव्ययकारि अस्ति इति दम्पतिभ्याम् उक्तम्। तौ अधिकं धनं क्रीडनकेषु यात्रासु च व्ययितवन्तौ स्तः। एतस्मिन् विषये अन्तर्जाले बहुभिः चर्चा कृता।

**नन्दिनी-** आम्, तयोः व्ययविवरणं तु अतिविचित्रम् अस्ति, तौ स्वव्यये नियन्त्रणं कृतवन्तौ न स्तः। अधुना अपूर्वं विवाहप्रस्तावं शृणु। एकेन गुल्मपतिना गणवेशे सति विमान-प्रशिक्षण-केन्द्रे विवाहप्रस्तावः उपस्थापितः। एतस्मिन् विषये उच्चाधिकारिभिः आक्षेपः कृतः, परन्तु सेवानिवृत्तैः सैनिकैः तस्य पक्षः समर्थितः।

**काव्या-** गुल्मपतेः गणवेशस्य मर्यादा आवश्यकी, परन्तु प्रेम अपि न अपराधः। वित्तविषये अपरं वृत्तम् अस्ति। एकेन तन्त्रज्ञेन कथितं यत् तेन षट्त्रिंशल्लक्षरूप्यक- वार्षिकवेतनान्वितवृत्तिः प्राप्ता, किन्तु तस्मिन् हस्ते प्राप्यमाणं वेतनं तस्य वर्तमानात् पञ्चविंशतिलक्ष-वेतनात् न्यूनं वर्तते। अतः सः चिन्ताकुलः जातः।

# "विनोदकणिका"©®

कस्मिंश्चित् नगरे 'New Husbands' (पतिचयनार्थम्) इति भाण्डागारः उद्घाटितः। षड्-अट्टयुक्तः भाण्डागारः आसीत्। अट्टस्य प्रत्येकं तले पत्युः चयनस्य व्यवस्था आसीत्।

प्रथमतलात् परं परं गत्वा उत्तमः पतिः प्राप्तुं सम्भावना वर्धते स्म। प्रत्येकस्मिन् तलभागे भर्तुः विशेषताः लिखिताः आसन्। तस्मिन् भाण्डागारे एका युवती पतिं चिन्वितुम् आगतवती।

**प्रथमतले-** एतेषां पुरुषाणां वृत्तिः अस्ति।

**द्वितीयतले-** एतेषां पुरुषाणां वृत्तिः अस्ति, तथा च बालकान् प्रेम्णा पश्यन्ति।

**तृतीयतले-** एतेषां पुरुषाणां वृत्तिः अस्ति, ते बालकान् प्रेम्णा पश्यन्ति, तथा च अत्यन्तं रूपवन्तः अपि सन्ति।

**चतुर्थतले-** एतेषां पुरुषाणां वृत्तिः अस्ति, ते बालकान् प्रेम्णा पालयन्ति, रूपवन्तः अपि सन्ति, तथा च गृहकार्यं कर्तुम् अपि जानन्ति।

**पञ्चमतले-** उपर्युक्तैः सर्वैः गुणैः सह एते पुरुषाः रोमाण्टिकाः अपि सन्ति।

युवती अतीव प्रसन्ना अभवत्। "अधुना षष्ठतलम् अपि पश्यामि" इति चिन्तयित्वा सा उपरि गतवती।

**षष्ठतले लिखितम् आसीत्-**

"भवती अस्मिन् तले आगच्छन्ती ३१४५६०१२ क्रमाङ्कस्य महिला अस्ति। अस्मिन् तले कोऽपि पुरुषः नास्ति। स्त्रियाः तृप्तिः कदापि न भवितुम् अर्हति।"

भाण्डागारम् आगमनस्य कृते धन्यवादः। उपर्युक्तस्य भाण्डागारस्य स्वामिना मार्गस्य पारं अन्यः भाण्डागारः उद्घाटितः। तस्य नाम आसीत् 'New Wives' (पत्नीचयनार्थम्)।

प्रथमतलस्य उपरि लिखितम् आसीत्- "एताः स्त्रियः पुरुषान् शृण्वन्ति।" द्वितीय-तृतीय-चतुर्थ-पञ्चम-षष्ठतलेषु कदापि न कश्चित् पुरुषः गतः।

😆😅🤷😯 डा. वर्षा प्रकाश टोणगांवकर
पुणे/ महाराष्ट्रम्




# नी भुलणा भराड़ीघाट

ब्लॉसपुरा ते शिमले जो जांदेयाँ
औन्दा था बीच रास्ते च भराड़ीघाट
सब औणे जाणे वाले खांदे थे खाणा उत्थी
ड्राइवर कने कंडक्टरां रे तां हुंदे थे पूरे ठाठ

कच्ची हुन्दी थी सड़क शिमले री
मुकदे नी थे छोटे कने बड्डे मोड़
धूड़ी कने भरी जांदे थे सारे
पूरे जिसमां रा दुखी जांदा था इक्क इक्क जोड़

पुराणियाँ हुन्दी थी बसां टाटा रियाँ
बड़ी मुश्क़िला ने बदलोंदा था गेर
स्पीड बी हुन्दी थी बड़ी घट
सवारियां चकदेयाँ त्वारदेयां हुई जांदी थी देर

अदरक कने टमाटर मिलदे थे सस्ते
लोग झोले.भरी भरी थे लई जांदे
भराड़ीघाटा री बटलोहिया री मांह री दाल़
चौल़ राजमाह कने कढ़ी खूब थे खांदे

पहली बार उजड़या भराड़ीघाट तांजे चमाखड़ी पुल
बणया नवां रुकणे कने खाणे रा ठकाणा
छडी दित्या लोकें भराड़ीघाट रुकणा
बसा वाल़ेयां बी करी त्या शुरू चमाखड़िया ई खाणा खाणा

हौल़ेयां हौल़ेयां लोक भूली गए भराड़ीघाट
याद रहया चमाखड़िया रा नाल़ूये रा पाणी
सदा नी रहन्दा कुछ बी उजड़ी जाणा हुण चमाखड़ी भी
फोरलेन तांजे धुंधणा चियें निकल़ी जाणी

फोरलेना पर बणना हुण कोई होर नवां ठकाणा
लोकां औदेयां जांदेयां उत्थी फेरी खाणा खाणा
आदमी सिर्फ जियूंदैयाँ जो रखदा याद
भराड़ीघाट कने चमाखड़िया रा बी सबीं नांव भूली जाणा

**रवींद्र कुमार शर्मा, घुमारवीं**
**जिला बिलासपुर हि प्र**



# पुत्रस्य वक्तव्ये कृषिमन्त्रिणः तीव्रप्रतिक्रिया; दलीयमर्यादां रक्षितुं चन्द्रकुमारस्य परामर्शः



**हिमसंस्कृतवार्ताः- शिमला।** कृषिमन्त्री चन्द्रकुमारः स्वपुत्रस्य पूर्व-सी.पी.एस. नीरजभारतिनः सद्यः प्रकटीकृतस्य वक्तव्यस्य उपरि तीव्रां प्रतिक्रियाम् अददात्। तेन कथितं यत् यदा जनकस्य पदत्राणं पुत्रस्य पादे आयाति, तदा तस्य मार्गः (लाइन) चिन्तनं च किञ्चित् भिन्नं भवति। सः अवदत् यत् भारतिनः वक्तव्यं दलस्य (पार्टी) सर्वकारस्य च सर्वसाधारणीं छविं नकारात्मकपेण प्रभावितं करोति। चन्द्रकुमारेण सार्वजनिकमञ्चेषु ईदृशानां विषयाणाम् उत्थापनम् अनुचितं प्रतिपादितं, उक्तं च यत् दलः एतादृशान् आरोपान् न स्वीकरोति। तेन स्पष्टीकृतं यत् वित्तमञ्जूषाणां आरोपाः अपि सर्वथा आधारहीनाः सन्ति। भारतिना तथ्यं विना सम्भाषणं न करणीयम् आसीत्। चन्द्रकुमारः उक्तवान् यत् नीरजभारतिना त्यागपत्रं न दातव्यम् आसीत्, एषः निर्णयः शीघ्रतायाम् उद्वेगे वा गृहीतः स्यात्। मन्त्रिणा एतदपि कथितं यत् दलेन त्यागपत्रस्य सद्यः स्वीकरणात् पूर्वं नीरजभारतिना सह विचारविमर्शः करणीयः आसीत्।

### दलीयमञ्चे उत्थापनीयः आसीत् एषः विषयः-

शनिवासरे मन्त्रिमण्डलस्य उपवेशनात् पूर्वं संवाददातृमेलने चन्द्रकुमारः बलम् अददात् यत् एतादृशैः आरोपैः दलस्य सर्वकारस्य च उभयोः उपरि प्रश्नाः उत्तिष्ठन्ति। मन्त्रिणा लोकतान्त्रिक-व्यवस्थायां राजनैतिकमर्यादायाः सङ्घटनात्मक-अनुशासनस्य च स्थिरीकरणे बलं दत्तम्। तेन प्रतिपादितं यत् यदि कापि असन्तुष्टिः उपालम्भः वा आसीत्, तर्हि तद् दलस्य आन्तरिकमञ्चे एव उत्थापनीयम् आसीत्।

### नीरजभारती दले महत्त्वपूर्णानाम् उत्तरदायित्वानां निर्वहणं कृतवान्-

नीरजभारती दले प्रमुखाणाम् उत्तरदायित्वानां निर्वहणं कृतवान्। तेन मुख्यमन्त्रिणा दलनेतृत्वेन च सह उपविश्य विमर्शः करणीयः आसीत्। सः अवदत् यत् दलः अनुशासनेन चलति, सङ्घटने च अनुशासनस्य रक्षा सर्वेषां कार्यकर्तृणाम् उत्तरदायित्वं वर्तते। सार्वजनिकरूपेण सर्वकारस्य विरुद्धं भाषणं दलस्य हिते नास्ति। युवनेतृषु बहुवारं भावनावेगवशात् निर्णयानां स्वीकरणस्य स्थितिः जायते, नवयुनः क्रुध्यन्ति च। चन्द्रकुमारेण कथितं यत् दलस्य आन्तरिके मतभेदाः भवितुं शक्नुवन्ति, परन्तु तेषां समाधानं वार्तालापेन एव सम्भवति। भारती सुदीर्घकालात् राजनीतौ सक्रियोऽस्ति तथा च द्विवारं विधायकः अपि आसीत्। सः राजनैतिक-कार्यप्रणालीं सङ्घटनात्मकमर्यादां च सम्यक्तया अवगच्छति। दलं सम्भाषणमाध्यमेन सर्वेषां प्रकरणानां समाधानं कर्तुं प्रयासम् करिष्यति।



मन्त्रिमण्डलेन मण्डी-जनपदस्य नागरिक- चिकित्सालय-सरकाघाट इत्यस्य क्षमता १०० शय्यातः वर्धयित्वा १५० शय्याः कर्तुं तथा तदर्थम् आवश्यकाणि पदानि सृजित्वा पूरयितुं सम्मतिः दत्ता। नागरिकचिकित्सालय-बद्दी इत्यस्य २०० शय्यायुक्त- चिकित्सालयरूपेण स्तरोन्नयनं कर्तुं, सोलनजनपदस्य मानपुराक्षेत्रे प्राथमिक- स्वास्थ्यकेन्द्रं प्रारब्धुं तस्य सञ्चालनाय आवश्यकाणि पदानि सृजित्वा पूरयितुं च निर्णयः विहितः। मन्त्रिमण्डलेन हमीरपुर-जनपदस्य 'मझेली' क्षेत्रे प्राथमिकस्वास्थ्य-उपकेन्द्रं प्रारब्धुं तदर्थं पदानि सृजित्वा पूरयितुं च स्वीकृतिः दत्ता।

## उत्थापितं उत्सवानां स्तरम्

उपवेशने सोलन-जनपदस्य राज्यस्तरीय-'शूलिनी मेला' उत्सवं राष्ट्रीयस्तरीयत्वेन परिणतकर्तुं सम्मतिः प्रदत्ता। चम्बा-जनपदस्य छतराड़ी-स्थिते मां शिवशक्ति जातर उत्सवं, काङ्गड़ा-जनपदस्य इन्दौरा-स्थिते शिवरात्रि-काठगढ़ उत्सवं च राज्यस्तरीय- उत्सवरूपेण प्रतिष्ठापितुं स्वीकृतिः दत्ता। काङ्गड़ा-जनपदस्य नेरटी रैत उत्सवं, सोलनस्य अर्की-तहसीलस्य बाड़ीधार उत्सवं (सरयांज), चम्बायाः छिंज उत्सवं (गरनोटा) तथा मण्ड्याः करसोग-तहसीलस्य नाहवीधार उत्सवं जनपदस्तरीय-उत्सवरूपेण (जिला स्तरीय) स्वीकर्तुं मन्त्रिमण्डलेन अनुमोदनं कृतम्।

### जुब्बल-क्रीडाछात्रावासे पूरयिष्यन्ते २३ पदानि

उपवेशने शिमला-जनपदस्य जुब्बल-स्थिते 'ठाकुर रामलाल कन्या खेल छात्रावास' इत्यस्य स्तरोन्नयनं कृत्वा 'ठाकुर रामलाल राजकीय बालिका खेल विद्यालय जुब्बल' इति रूपेण परिवर्तितं विहितं, विभिन्नश्रेणीनां २३ पदानि सृजित्वा पूरयितुं च स्वीकृतिः प्रदत्ता। मन्त्रिमण्डलेन 'मुख्यमंत्री सहारा योजना' इत्यस्याः सुचारु-प्रभावशाली-कार्यान्वयनं निश्चितं कर्तुं संशोधित-मानक-सञ्चालन-प्रक्रिया (SOP) अपि अनुमोदिता। शिक्षासचिवेन मन्त्रिमण्डलस्य सम्मुखं सी.बी.एस.ई. विद्यालयेभ्यः सम्बद्धा एका प्रस्तुतिः अपि दत्ता।

## वृक्षरक्षणमेवात्र धर्मो हि परमो मुदा



वृक्षरक्षणमेवात्र धर्मो हि परमो मुदा
तेनैव पृथिवी सर्वा भवति सुखिनी सदा
छिन्दन्तु नहि भो वृक्षान् जीवनं धारयन्ति ते
प्रहाय दूषितान्वायून् यच्छन्ति स्वास्थ्यवर्धकान्।१।
अहो तापो भृशं तापःकथने किं प्रयोजनम्
उपायं कुरुताद्भ्रातो बहुशो वृक्षरोपणम्।२।
जीवनं प्रकृतेर्हेतोःप्रकृतितो हि जीवनम्
प्रकृतिरक्षणं कृत्वा जीव्यतां शतवत्सरम्।३।
रक्षिता रक्षितव्याश्च वृक्षा नु जीवनप्रदाः
तेषामेव विनाशेन जीवलोका विनाशिताः।४।
यदि वृक्षा न स्युर्भूमौ धरा च न विराजिता
अतस्सर्वैर्जनैर्नूनं पादपाःपरिरक्षिताः।५।
प्रकृतेःप्रतिकूलेन विनाशोऽत्र विजायते
ततो वृक्षाधिरोपेण परिवेशो विरक्ष्यते।६।
वृक्षैर्वर्धयते लोको वृक्षैर्वायुर्विवर्धते
तस्माद्रोपणमेतेषां धर्म इत्युपदिश्यते।७।
वृक्षारोपणमस्माकं पर्यावरणरक्षणम्
जीवने जीवनाधारं समेषां जीवनायनम्।८।
वृक्षरक्षणमेवात्र धर्मो हि परमो मुदा
तेनैव पृथिवी सर्वा भवति सुखिनी सदा।९।
प्रथमप्रबलवृष्ट्या प्रसुतं शीतजालं
हृदयसुखकरं तन्मोदते सर्वलोकम्
सरसि सरसि तोयं शोभते राजरागे
व्रतपरिणतलोका मोदकन्दं लभन्ते।१०।



समस्तसर्गस्य निसर्गभूते
जगत्प्रसिद्धे मूलरूपगात्रे
संसारसारे प्राणिजातमात्रे
नमांसि भूयांसि नमो नमस्ते।११।

**हिमसंस्कृतवार्ता**

**आचार्यः डॉ. रुरुकुमारमहापात्रः**
**राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः**

# गौतम अडानी पुनः एशिया महाद्वीपस्य धनिकतमः व्यक्तिः अभवत्, द्वौ दिग्गजौ पृष्ठतः अकरोत्

अडानी समूहस्य अध्यक्षः गौतम अडानी एकवारं पुनः एशिया महाद्वीपस्य समृद्धतमः व्यक्तिः संजातः। सः धनस्य विषये टिकटॉक-संस्थापकं झांग यि-मिंग महोदयं रिलायंस इण्डस्ट्रीज-अध्यक्षं मुकेश अंबानी



महोदयं च बहु पृष्ठतः त्यक्तवान्। ब्लूमबर्ग बिलेनियर इण्डेक्स (Bloomberg Billionaires Index) इत्यस्य आँकड्यानुसारं गौतम अडानी महोदयस्य सम्पत्तिः १२० बिलियन (१२० अरब) डॉलर परिमिता अभवत्। विश्वस्य शतकोट्यधिपतीनां (अरबपतियों की) श्रेण्यां अडानी महोदयः सप्तदशे (17th) स्थाने अस्ति। अपरपक्षे, चीने टिकटॉक-संस्थापकस्य झांग यि-मिंग महोदयस्य पार्श्वे ९२.८ बिलियन डॉलर परिमिता सम्पत्तिः अस्ति, तस्य च श्रेण्यां एकविंशतितमं (21st) स्थानं वर्तते। अतिरिच्य रिलायंस इण्डस्ट्रीज-अध्यक्षस्य मुकेश अंबानी महोदयस्य सम्पत्तिः ८५.८ बिलियन डॉलर परिमिता अस्ति। मुकेश अंबानी महोदयस्य श्रेण्यां त्रयोविंशतितमं (23rd) स्थानं वर्तते। अनेन प्रकारेण, एशिया महाद्वीपस्य शीर्ष-त्रयाणां शतकोट्यधिपतीनां (टॉप तीन अरबपतियों की) सूच्यां गौतम अडानी प्रथमः, यि-मिंग द्वितीयः, मुकेश अंबानी च तृतीयः अस्ति।